1

श्रीगणेशाय नमः ॥ श्रीसूर्य उवाच ॥ शांबशांब महाबाहो शृणु मे क
वचं शुभं ॥ त्रैलोक्यमंगलं नाम कवचं परमाद्भुतं ॥ १ ॥ यं ज्ञात्वा मंत्रवित्स
म्यक् फलमाप्नोति निश्चितं ॥ यद्धृत्वा च महादेवो गणानामधिपो
१ ऽभवत् २ पठनाद्धारणाद्विष्णुः सर्वेषां पालकः सदा ॥ एवमिन्द्रा
दयः सर्वे सर्वैश्वर्यमवाप्नुयात ३ ॥ कवचस्य ऋषिर्ब्रह्मा छंदोऽनु १
ष्टुबुदाहृतं ॥ श्रीसूर्यो देवता मंत्रः सर्वदेवनमस्कृतः ४ यशोऽरोग्य
मोक्षेषु विनियोगः प्रकीर्तितः ॥ प्रणवो मे शिरः पातु घृणिर्मे
पातु भालकं ५ सूर्योऽव्यान्नयनद्वंद्वमादित्यः कर्णयुग्मकं ॥ अ
ष्टाक्षरो महामंत्रः सर्वाभीष्टफलप्रदः ६ ह्रीं बीजं मे मुखं पातु हृदयं

यस्यसंकीर्तिनंदपि ॥१३॥ सूर्य्यपत्रेसमालिख्यगोरचनागुरुकुंकुमैः ॥ गवि
वायुचसंक्रांतौसप्तम्यांवाविशेषतः ॥१४॥ धारयेत्साधकाः श्रेष्ठत्रैलोक्यवि
जयीभवेत् ॥ त्रिलोहमध्यगंकृत्वाधारयेद्दक्षिणेभुजे ॥१६॥ शिखायाम
थवाकंठेसोपिसूर्य्योनसंशयः ॥ इतितेकथितंसांबत्रैलोक्यमंगला
भिधं ॥१७॥ कवचंदुर्लभंलोकेतवस्नेहात्प्रकाशितं ॥ अज्ञात्वाकवचं
२ दिव्यंयोजपेत्सूर्यमुत्तमं ॥१८॥ सिद्धिर्नजायतेतस्यकल्पकोटिशतै
रपि ॥१९॥ इतिश्रीसूर्य्यकृतंश्रीसूर्य्यकवचंसमाप्तम् ॥ छ ॥ मम
स्तु ॥ मदत्रपाठेजगदम्बिकेमयाविसर्गबिंदुजनहीनमीरितं
ननस्तुसंपूर्णतमंप्रसादात्समग्रसिद्धिर्मेपीसाडुपायतामा
रामरामरामरामरामराम ०ः॥ रामरामराम
सम्वत् ॥१८७२ रामरामरामराम

भुवनेश्वरः ॥ चन्द्रबीजं विसर्गाढ्यं पातु मे गुल्फदेश[illegible]
महामंत्रः सर्वतंत्रेषु गोपितः ॥ त्रिकोणवह्निसमायुक्तो वामा[illegible]
मूर्धतं ८ एकाक्षरो महामंत्रः श्रीसूर्यस्य प्रकीर्तितः ॥ गुह्याद्गुह्य[illegible]
तरो मंत्रो वांछाचिंतामणिः स्मृतः ९ शीर्षादापादपर्यन्तं सदा पातु मनू
त्तमः ॥ इति ते कथितं दिव्यं त्रिषु लोकेषु दुर्लभं १० श्रीप्रदं कीर्तिदं नि
त्यं धनारोग्यविवर्द्धनम् ॥ कुष्ठादिरोग[illegible] शमनं महाव्याधिवि
नाशनम् ११ त्रिसंध्यं यः पठेन्नित्यमरोगी बलवान्भवेत् ॥ बहु
नाकिमिहोक्तेन यद्यन्मनसि वर्तते १२ तत्सर्वं भवत्येव कवचस्य
च धारणात् ॥ भूतप्रेतपिशाचाश्च यक्षगंधर्वराक्षसाः १३
ब्रह्मराक्षसवेतालाः न दृष्टुमपि तं क्षमाः ॥ दूरादेव पलायंते

3
कै ३